इति राजनिर्घण्टः ॥ पितृतीर्थम् । तत्तु तर्ज्जन्यङ्गुष्ठान्तः । इति हेमचन्द्रः । ३ । ५०४ ॥ ( पितुरिदं पितुरागतं वेति । पितृ+"पितुर्यत् ।" ४ । ३ । ७९ । इति यत् । ततो रीङादेशः ।) पितृसम्बन्धिनि, त्रि । यथा,—
"ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः ।
शेषास्तमुपजीवेयुर्यथैव पितरन्तथा ॥"
इति दायभागः ॥
(पितृप्रियत्वात् श्राद्धार्हे च त्रि । यथा, सुश्रुते । १ । ४६ ।
"कषायं खड्गिपिशितं कषायमनिलापहम् ।
पित्र्यं पवित्रमायुष्यं बद्धमूत्रं विरूक्षणम् ॥")

पित्र्यः, पुं, ( पितुस्तुल्य इति । बाहुलकात् यत् । ततो रीङादेशः ।) ज्येष्ठभ्राता । इति हेमचन्द्रः । ३ । २१५ ॥ (पितॄणां प्रिय इति यत् ।) माषः । इति शब्दमाला ॥

पित्र्या, स्त्री, (पितरो देवता अस्या इति । पितृ+यत् । पितृदेवतत्वादेव तथात्वम् । ) मघानक्षत्रम् । इति हेमचन्द्रः । २ । २५ ॥ पौर्णमासी । इति शब्दमाला ॥

पित्सत्, [ त् ] पुं, ( पतितुमिच्छतीति । पत्+सन्+"सनि मीमाघुरभलभशकपतपदामच इस् ।" ७ । ४ । ५४ । इति इस् । अभ्यासस्य लोपश्च । ततः पित्स+शतृ ।) पक्षी । इत्यमरः । २ । ५ । ३४ ॥ प्रतिपन्ने पतनेच्छौ च त्रि । इति विश्वः ॥

पिल्लला, स्त्री, ( पतत्यनेनेति । पत+"सलः पतिदहिभ्यां ।" २ । २६२ । इति उणादिकोषधृतसूत्रात् अधिकरणे सलः । अकारस्य इत्वं । ) पन्थाः । इत्युणादिकोषः । २ । २६२ ॥

पिधानं, क्ली, (अपि+धा+ल्युट् । अपेरल्लोपः ।) छादनम् । इत्यमरः । १ । ३ । १३ ॥ ( यथा, आर्य्यासप्तशत्याम् । ४८९ ।
"युगपज्जघनोरःस्तनपिधानमधुरे ! चपाश्रिताङ्गेसुखि ! ।
लोलाक्षि ! नैष पवनो विरमति तव वसनपरिवर्त्तौ ॥")
उद्घाटनम् । इति हेमचन्द्रः । ४ । ६२ ॥

पिनद्धः, त्रि, (अपि नह्यते स्मेति । अपि+नह+क्तः । अपेरल्लोपः । ) परिहितवस्त्रादि । तत्पर्य्यायः । आमुक्तः २ प्रतिमुक्तः ३ अपिनद्धः ४ । इत्यमरः । २ । ८ । ६५ ॥ ( आच्छादितः । यथा, भागवते । ११ । ८ । ३३ ।
"यदस्थिभिर्निर्म्मितवंशवंश्यस्थूणं त्वचा रोमनखैः पिनद्धम् ॥")

पिनाकः, पुं क्ली, ( पाति रक्षति पनाय्यते स्तूयते वा । पाल रक्षणे, पन स्तुतौ वा+"पिनाकादयश्च ।" उणां ४।१५। इति आकप्रत्ययेन निपातनात् साधुः ।) शिवधनुः । तत्पर्य्यायः । अजगवम् २ । (यथा, महाभारते । ६ । ६० । १८ ।
"पिनाकमिव रुद्रस्य क्रुद्धस्याभिघ्नतः पशून् ॥")
शूलम् । इत्यमरः । १ । १ । ३७ ॥ शूलमपि शार्ङ्गमित्येति केचित् । इति भरतः ॥ पांशुवर्षणम् । इति मेदिनी । के, ११६ ॥

पिनाकी, [न्] पुं, ( पिनाकोऽस्यस्येति । इनिः । ) शिवः । इत्यमरः । १ । १ । ३३ ॥ ( यथा, हरिवंशे । ३५ । २० ।
"कृत्वा च निश्चयं सर्व्वे पलायनपरायणाः ।
विहाय मथुरां रम्यां मानयन्तः पिनाकिनम् ॥"
रुद्रभेदः । यथा, मात्स्ये । ५ । २९—३० ।
"अजैकपादहिर्ब्रध्नो विरूपाक्षोऽथ रैवतः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः ॥")

पिन्यासं, क्ली, ( अपिगतो विन्यासो व्यक्तगन्धत्वात् न्यासो यस्य । अपेरल्लोपः । ) हिङ्गु । इति जटाधरः ॥

पिपतिषत्, [ त् ] त्रि, ( पतितुमिच्छतीति । पत+सन् । ततः शतृ । ) पतनेच्छुः । विहङ्गमे, पुं । इति मेदिनी । ते, २३१ ॥

पिपतिषुः, पुं, ( पतितुमिच्छतीति । पत+सन् । पिपतिस+"सनाशंसभिक्ष उः ।" ३।२।१६८ । इति उः । ) पक्षी । इति राजनिर्घण्टः ॥ (पतनेच्छौ, त्रि ॥ )

पिपासा, स्त्री, (पातुमिच्छेति । पा+सन्+अः । ततष्टाप् । ) पानेच्छा । तत्पर्य्यायः । तृष्णा २ तर्षः ३ उदन्यासिका ४ तट् ५ तृषा ६ उदन्या ७ । इति हेमचन्द्रः । ३ । ५८ ॥ ( यथा, सुश्रुते सूत्रस्थाने १ अध्याये । "स्वाभाविकाः क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयः ॥")

पिपासितः, त्रि, ( पिपासा जातास्येति । पिपासा+इतच् । ) पिपासायुक्तः । तृषितः । इति हलायुधः ॥ ( यथा, मनौ । ८ । ९३ ।
"नग्नो मुण्डः कपालेन भिक्षार्थी क्षुत्पिपासितः ।
अन्धः शत्रुकुलं गच्छेद्यः साक्ष्यमनृतं वदेत् ॥")

पिपासुः, त्रि, ( पातुमिच्छुः । पा+सन्+उः । ) पानेच्छुः । तत्पर्य्यायः । तृषितः २ तृष्णक् ३ । इति हेमचन्द्रः । ३ । ५७ ॥ ( यथा, महाभारते । ३ । २२३ । २५ ।
"भागार्थं तपसो धातुं तेषां सोमं तथाध्वरे ।
पिपासवो ययुर्देवाः शतक्रतुपुरोगमाः ॥")

पिपीतकः, पुं, ब्राह्मणविशेषः । अस्य प्रमाणं पिपीतकीशब्दे द्रष्टव्यम् ॥

पिपीतकी, स्त्री, (पिपीतको ब्राह्मणविशेषः प्रवर्त्तकतयास्त्यस्येति । अच् । गौरादित्वात् ङीष् । ) वैशाखशुक्लद्वादशी । तत्र कर्त्तव्यव्रतं यथा,—
शतानीक उवाच ।
"जलदानस्य माहात्म्यं यत्त्वया परिकीर्त्तितम् ।
तदहं श्रोतुमिच्छामि पिपीतकीकथां शुभाम् ॥
पुरा केन कृतञ्चैतत् केन चैतत् प्रकाशितम् ।
कथं पिपीतकीनाम विधानञ्चैव कीदृशम् ॥
तत् सर्व्वं ब्रूहि देवर्षे ! यदि तुष्टो मयि प्रभो ! ॥
नारद उवाच ।
शृणु राजन् ! प्रवक्ष्यामि द्वादशीं तां पिपीतकीम् ।
यां कृत्वा यमलोकाद्वै प्राप्यते वैष्णवं पदम् ॥
पिपीतक इति ख्यातो ब्राह्मणः संशितव्रतः ।
तपःस्वाध्यायनिरतः सर्व्वप्राणिहिते रतः ॥
शान्तो दान्तः क्षमायुक्तो बलिहोमपरायणः ।
निवसन् निर्जनेऽरण्ये बहून् कालान् द्विजोत्तमः ॥
चिरं कृत्वा तपोऽरण्ये काले न्वत्युमुपेयिवान् ॥
ततः कालेन कियता यमदूतैर्म्महाबलैः ।
नीयमानः स विप्रेन्द्रो यमलोकं भयावहम् ॥
ददर्श बहुशस्तत्र नराम्निरयसंस्थितान् ॥
असिपत्राद्यनेकेषु कुम्भीपाकेषु संस्थितान् ।
कृतार्त्तरावांस्तान् दृष्ट्वा विषादमगमद्द्विजः ।
क्षुत्पिपासाकुलो भूत्वा प्रेतराजवशं गतः ॥
बहून् वस्त्रावृतान् कुम्भान् ददर्शातिमनोहरान् ।
प्रदेशानीप्सितांस्तत्र प्रासादैरुपशोभितान् ॥
गीतवाद्यादिशब्दैश्च सेव्यमानः समन्ततः ।
क्वचित् प्रहरमाणांश्च किङ्करैर्यमशासनैः ॥
नीयमानांस्ततः प्रेतान् बध्यमानान् स्वकर्म्मभिः ।
शोकसन्तापसंयुक्तान् तृषया परिपीड़ितः ॥
संप्रश्नमानो राजेन्द्र ! ययाचे किङ्करान् जलम् ।
बहुशो याच्यमानैश्च किङ्करैरभिताड़ितः ॥
स नीयमानो ददर्श बहुशाखं द्रुमोत्तमम् ।
सुच्छायं शीतलं रम्यं महान्तं पिप्पलद्रुमम् ॥
तत्रैव सजलान् कुम्भान् माल्यग्रीवान् सुशोभितान् ।
ददर्श वस्त्रावृतमुखान् सुवासितसुशीतलान् ॥
रक्षन्ति बहवस्तत्र किङ्करा शस्त्रपाणयः ।
तोयदर्शनमात्रेण साक्षादो ब्राह्मणोऽभवत् ॥
विनयावनतो भूत्वा ययाचे किङ्कराज्जलम् ।
ब्राह्मण उवाच ।
यमदूता महात्मानस्तोयं मे दीयतामिति ।
अप्राप्य तोयं प्राणानां विनाशो जायते ध्रुवम् ॥
तस्मात्तोयप्रदानेन प्राणान्रक्षत मेऽधुना ।
श्रुत्वा विप्रस्य तद्वाक्यं सम्प्रयुर्यमकिङ्कराः ॥
न कृतं कर्म्म तद्विप्र ! येन तोयञ्च लभ्यते ॥
प्रार्थयानः पुनस्तोयं यमदूतैः स ताड़ितः ॥
तृषार्त्तवचनं श्रुत्वा यमः प्रोवाच तं द्विजम् ।
ब्रूहि त्वं विप्र ! मा रोदीः का ते पीड़ास्ति चेतसि ॥
पुनर्य्ययाचे तत्तोयं तृषयाकुलचेतनः ।
श्रुत्वा विप्रस्य तद्वाक्यं तमुवाच स धर्म्मराट् ॥
त्वया तन्न कृतं कर्म्म येन वै लभ्यते जलम् ॥
ब्राह्मण उवाच ।
त्वयि प्रसन्ने दिक्पाल ! तत्तोयं दुर्लभं न मे ।
तस्मात्तोयप्रदानेन प्राणरक्षां कुरु प्रभो ! ॥
इत्थं बहुविधैर्व्वाक्यैर्यमः प्रीतोऽभवत्तदा ॥
यम उवाच ।
वरं वरय विप्रेन्द्र ! यत्ते मनसि वर्त्तते ॥
ब्राह्मण उवाच ।
यदि तुष्टोऽसि मे देव ! येन प्राप्तोऽसि तज्जलम् ।
तत् कुरुष्व धर्म्मराज ! सर्व्वप्राणीश्वर ! प्रभो ! ॥